# Kashiyatravidhyupadesham

# કાશીયાત્રાવિધ્યુપદેશમ્

## Document Information

Text title : Kashiyatravidhyupadesham

File name : kAshIyAtrAvidhyupadesham.itx

Category : shiva, upadesha, advice, shivarahasya, tIrthakShetra

Location : doc_shiva

Transliterated by : Ruma Dewan

Proofread by : Ruma Dewan

Description/comments : shrIshivarahasyam | ugrAkhyaH saptamAMshaH | adhyAyaH 12 | vAvRittashlokAH ||

Latest update : March 8, 2024

Send corrections to : sanskrit at cheerful dot c om

This text is prepared by volunteers and is to be used for personal study and research. The file is not to be copied or reposted without permission, for promotion of any website or individuals or for commercial purpose.

**Please help to maintain respect for volunteer spirit.**

Please note that proofreading is done using Devanagari version and other language/scripts are generated using **sanscript**.

March 8, 2024

*sanskritdocuments.org*

# કાશીયાત્રાવિધ્યુપદેશમ્

- શિવપાર્વતીસંવાદે -
કાશી યાત્રાવિધિં વક્ષ્યે શ ૃણુસાદરમમ્બિકે ।
નિયમા બહવઃ સન્તિ કાશીયાત્રારતાત્મનામ્ ॥ ૯૯॥

તતસ્ત્વયં સમુચ્ચાર્યો મન્ત્રઃ સર્વાર્થસાધકઃ ।
પૂજયિત્વા વિશેષેણ લિઙ્ગરૂપિણમીશ્વરમ્ ॥ ૧૦૯॥

શિવ ગૌરીપતે શ્રીમન્ ભક્તવત્સલ શઙ્કર ।
કાશીયાત્રાં કરિષ્યેઽહં નિર્વિઘ્નં કુરુ સર્વદા ॥ ૧૧૦॥

અથ ગણેશ મન્ત્રઃ
વિઘ્નેશ ભક્તવરદ વિઘ્નરાજ ગણાધિપ ।
કાશીયાત્રાં કરિષ્યેઽહં નિર્વિઘ્નં કુરુસર્વદા ॥ ૧૧૧॥

અથ ભૈરવ મન્ત્રઃ
કાલભૈરવ સર્વાત્મન્ કાલનાશકર પ્રભો ।
કાશીયાત્રાં કરિષ્યેઽહં નિર્વિઘ્નં કુરુ સર્વદા ॥ ૧૧૨॥

અથ દુર્ગા મન્ત્રઃ
જય દુર્ગે જગદ્વન્દ્યે જય દુર્ગે શિવપ્રિયે ।
કાશીયાત્રાં કરિષ્યેઽયં નિર્વિઘ્નં કુરુ સર્વદા ॥ ૧૧૩॥

તતો માં વૃષભારૂઢં દિવ્યમઙ્ગલવિગ્રહમ્ ।
મુક્તાદામપરીતાઙ્ગં મઙ્ગલપ્રદમુત્તમમ્ ॥ ૧૧૪॥

ગૌરીભૂષિતવામાઙ્ગમભયપ્રદસત્તમમ્ ।
ધ્યાત્વા સમ્યક્તતો ગચ્છેદન્યગ્રામં શુભે દિને ॥ ૧૧૫॥

નિરાહારેણ નિર્ગચ્છેન્મૌનવ્રતપરાયણઃ ।
અગૃહીત્વોપાનહ્રાદીન્કીટાનસ્પૃશ્ય ભૂગતાન્ ॥ ૧૧૬॥

શિવ ગૌરીપતે શ્રીમન્ વિશ્વનાથ સદાશિવ ।
કલ્યાણદેતિ સતતં સ્મરન્ મન્ત્રમિમં જપન્ ॥ ૧૧૭ ॥

રુદ્રાધ્યાયસ્યચાવૃત્તિઃ કર્તવ્યા વિધિપૂર્વકમ્ ।
તતો રુદ્રાક્ષભસ્માદિ ધૃત્વા ગચ્છેદ્યથાવિધિ ॥ ૧૩૬ ॥

એવં પ્રયત્નતો નિત્યં ગન્તવ્યં વિધિપૂર્વકમ્ ।
યાત્રાફલેપ્સુભિર્મર્ત્યૈઃ શૈવઃ શિવપરાયણઃ ॥ ૧૩૭ ॥

કાલત્રયેઽપિ કર્તવ્યં શિવલિઙ્ગસ્ય પૂજનમ્ ।
મધ્યાહ્ને શિવતુષ્ટ્યર્થં ભોજનીયાઃ શિવાર્ચકાઃ ॥ ૧૩૮ ॥

તતઃ શિવકથાઃ શ્રાવ્યાઃ શ્રોતવ્યાઃ પાપનાશિકાઃ ।
આસાયમતિયત્નેન તતઃ સન્ધ્યાશિવાર્ચનમ્ ॥ ૧૩૯ ॥

એવં યાત્રારતૈઃ શૈવૈર્મદ્ભક્તૈસ્તુ પદે પદે ।
અશ્વમેધફલં પૂર્ણં પ્રાપ્યતે નાત્ર સંશયઃ ॥ ૧૪૦ ॥

યથા યાત્રાપરં શૈવં દૃષ્ટ્વા તત્પિતરઃ પ્રિયે ।
અત્યન્તં મોદમાનાસ્તે નૃત્યં કુર્વન્તિ યત્નતઃ ॥ ૧૪૧ ॥

નરકે પતિતાનસ્માનુદ્ધરિષ્ય ત્યયં સુતઃ ।
કાશ્યાં શ્રાદ્ધં વિશેષેણ કરિષ્યતિ ન સંશયઃ ॥ ૧૪૨ ॥

જ્ઞાનવાપીજલં રમ્યં ધ્રુવકૃતામૃતમુત્તમમ્ ।
દાસ્યત્યસ્મભ્યમમલમયં નાસ્ત્યત્ર સંશયઃ ॥ ૧૪૩ ॥

જ્ઞાનવાપીતટે રમ્યે સોઽયમસ્મભ્યમોદરાત્ ।
શ્રાદ્ધં કૃત્વા વિધાનેન પિણ્ડદાનં કરિષ્યતિ ॥ ૧૪૪ ॥

સ્નાત્વાઽયં શિવગઙ્ગાયાં વંશોદ્ધારકરઃ સુતઃ ।
શ્રાદ્ધં કૃત્વા વિધાનેન પિણ્ડદાનં કરિષ્યતિ ॥ ૧૪૫ ॥

અયં કાર્કોટકે કુણ્ડે વિષદુઃખવિનાશકે ।
સ્નાત્વા શ્રાદ્ધં પિણ્ડદાનં કરિષ્યતિ ન સંશયઃ ॥ ૧૪૬ ॥

શ્રીમદોઙ્કુરકુણ્ડેઽપિ સ્નાત્વા શ્રાદ્ધં કરિષ્યતિ ।
પિણ્ડદાનમયં કૃષ્ણતિલૈઃ સાર્ધં કરિષ્યતિ ॥ ૧૪૭ ॥

કેદારકુણ્ડે વિમલે પિણ્ડદાનં કરિષ્યતિ ।
જલં કૃષ્ણતિલૈઃ સાર્ધં બહુદાસ્યત્યસંશયમ્ ॥ ૧૪૮ ॥

પદ્ભ્યાં વા યજ્જલં સ્પૃષ્ટ્વા કાશીસ્થમઘનાશનમ્ ।
દાસ્યત્યક્ષય્યમમલં દુઃખં ત્યાજ્યં તતઃ પરમ્ ॥ ૧૪૯॥

॥ ઇતિ શિવરહસ્યાન્તર્ગતે કાશીયાત્રાવિધ્યુપદેશં સમ્પૂર્ણમ્ ॥

- ॥ શ્રીશિવરહસ્યમ્ । ઉગ્રાખ્યઃ સપ્તમાંશઃ । અધ્યાયઃ ૧૨ । વાવૃત્તશ્લોકાઃ ॥

- .. shrIshivarahasyam . ugrAkhyaH saptamAMshaH . adhyAyaH 12 . vAvRRittashlokAH ..

Notes:
Śiva શિવ details to Pārvatī પાર્વતી about the do's and don't's of Kaśīyātrā કાશીયાત્રા. Some Śloka-s are collated here for this webpage.
Kaśī કાશી harbors several TīrthaKṣetra તીર્થક્ષેત્ર that are outlined in ŚivaRahasyam saptāṃśaḥ શિવરહસ્યં સપ્તાંશઃ.

Proofread by Ruma Dewan

---

*Kashiyatravidhyupadesham*
pdf was typeset on March 8, 2024

Please send corrections to *sanskrit@cheerful.com*